तिलानां मोदकं दिव्यं स गच्छेद्धरिमन्दिरम् ॥
यो दुग्धलड्डुकं दद्यात् केशवाय महात्मने।
स पिबेदमृतं स्नात्वा मन्वन्तरशतावधि ॥
हरये ललितं खण्डं यस्तु यच्छति जैमिने।
तस्य विष्णुः प्रसन्नात्मा छिनत्ति भवबन्धनम् ॥
विचित्रफाणितं यस्तु दद्याद्भगवते द्विज।
अन्ते शक्रपुरं गत्वा स भवेत् सुरवन्दितः ॥
निर्म्मलां शर्करां यच्छेद्यस्तु कृष्णाय भक्तिमान्
स किं न लभते विप्र वासुदेवप्रसादतः ॥
सुपक्वं फाल्गुने मासि मधुरं बदरीफलम्।
यस्तु यच्छति कृष्णाय फलं तस्य मयोच्यते ॥
इह भुङ्क्ते सुखं सर्व्वं पुत्त्रपौत्त्रसमन्वितः।
अन्ते हरेर्गृहं याति रथमारुह्य शोभनम् ॥
न दद्याद्गुड़संयुक्तं हरये बदरीफलम्।
अज्ञानाद्ब्राह्मणश्रेष्ठ दद्याच्चेन्नारकी भवेत् ॥
फाल्गुने मासि यो दद्याद्धरये दाड़िमीफलम्।
सुपक्वं तत्फलंविप्र वदतो मे निशामय ॥
तत्र यावन्ति बीजानि तिष्ठन्ति दाड़िमीफले।
तावन्मन्वन्तरं विष्णोर्गृहे तिष्ठति वैष्णवः ॥
फाल्गुने मासि यो दद्याद्धरये गुड़पिष्टकम्।
सविन्ते यो द्विजश्रेष्ठ वाजिमेधसहस्रकृत् ॥*॥
चैत्रे मासि द्विजश्रेष्ठ मधुना मधुसूदनम्।
स्नापयेल्लभते मर्त्यस्तद्विष्णोः परमं पदम् ॥
मधुना स्नापयेत् यस्तु नारायणमनामयम्।
न चर्च्चा क्रियते तस्य कदाचिद्रविसूनुना ॥
चैत्रे किंशुकपुष्पेण योऽर्च्चयेत् कमलापतिम्।
तन्नाम चित्रगुप्तेन पञ्जिकायां न लिख्यते ॥
चैत्रिके जगतामीशं कृष्णं तिलकपुष्पकैः।
यजतो नास्ति वै जन्म पुनरस्मिन् महीतले ॥
कृष्णं वञ्जुलपुष्पेण सर्व्वदेवशिरोमणिम्।
पूजयेन्मनुजो विप्र लभते नापदं क्वचित् ॥
वासन्तीभिः सुगन्धाभिर्व्वसन्ते यस्तु पूजयेत्।
भगवन्तं परात्मानं स देवैरपि पूज्यते ॥
जयाकिशलयैर्द्दिव्यैरखण्डैर्योऽर्च्चयेद्धरिम्।
तं वदन्ते समुत्थाय स्वयं पीठाद्यमोऽपि च ॥
धात्रीपत्रैर्नवीनैश्च कोमलैर्हरिमर्च्चयन्।
अचिरेणैव लभते सकलं वाञ्छितं जनः ॥
शाण्डिल्याखण्डपत्रैश्च धुस्तूरैश्चार्कपुष्पकैः।
योऽर्च्चेद्विष्णुमीशञ्च स संसाराब्धिपारगः ॥
यो दद्याद्विष्णवे विप्र कदलीफलमुत्तमम्।
शक्राद्यास्त्रिदशाः सर्व्वे वदन्ते तमहर्न्निशम्।
यो दद्याच्चैत्रिके मासि भक्त्या गोपालरूपिणे।
गोधूमपिष्टकं विप्र सर्व्वपापैः प्रमुच्यते ॥ * ॥
आयाते माधवे मासि पवित्रे माधवप्रिये।
आमिषं मैथुनं तैलं विष्णुभक्तः परित्यजेत् ॥
प्रातः समाचरेत् स्नानं माधवे मासि वैष्णवः।
परित्यजेत् परान्नञ्च न च कुर्य्यात् द्विभोजनम्॥
प्रभाते पूजयेद्विष्णुं पूर्व्वोक्तविधिना द्विजः।
वैशाखे स्नापयेद्विष्णुं पुष्पवासितवारिणा ॥
स्नापयेत् शीततोयेन सन्ध्यापर्य्यन्तमच्युतम्।
त्रिसन्ध्यं पूजयेद्भक्त्या नैवेद्यैर्व्विविधैः प्रभुम् ॥
वैशाखे चामलस्रग्भिर्लक्ष्मीपतिरलङ्कृतः।
न किं ददाति विप्रर्षे प्रसन्नः परमेश्वरः ॥
वैशाखे मासि यो दद्यात् यवान्नं चक्रपाणये।
तस्य पुण्यानि संख्यातुं कः समर्थोऽस्ति पण्डितः
यत्किञ्चिन्माधवे मासि माधवप्रीतिहेतवे।
दीयते मानवैर्व्विप्र तत् सर्व्वमक्षयं भवेत्।
यदन्यत् सुकृतं कर्म्म क्रियते मासि माधवे।
माधवप्रीतये विप्र क्षयं तस्य न विद्यते ॥
वैशाखो दुर्लभो मासः सर्व्वकामफलप्रदः।
पूजितव्यो हरिस्तत्र हित्वा कार्य्यशतान्यपि ॥
एकाहमपि यः पूजां वैशाखे कुरुते हरेः।
शतवर्षं हरिं यष्ट्वा यत् फलं लभते स तत् ॥
वैशाखे मासि यः कुर्य्यात् प्रपां माधवतुष्टये।
दिने दिनेऽश्वमेधस्य फलं प्राप्नोति मानवः ॥
वैशाखे सिञ्चयेन्नित्यं विष्णुमश्वत्थरूपिणम्।
चतुर्व्वर्गफलावाप्तिहेतवे वैष्णवो जनः ॥
गण्डूषमात्रतोयेन कुर्य्याद्योऽश्वत्थसेचनम्।
सोऽपि याति परं स्थानं विमुक्तः पाप-
कोटिभिः ॥

व्यास उवाच।

साक्षाद्देवः स्वयं विष्णुरश्वत्थोऽखिलविश्वराट्।
तद्भक्तिं कुर्व्वतः पुंसो विद्यते नाशुभं क्वचित् ॥
अश्वत्थं सेवते यस्तु विष्णुबुद्ध्या नरोत्तमः।
तस्य प्रसन्नो भगवान् ददाति परमं पदम् ॥"

इति पाद्मे क्रियायोगसारे ११ अध्यायः ॥*॥

व्यास उवाच।

"ज्यैष्ठे मासि द्विजश्रेष्ठ भगवन्तं जनार्द्दनम्।
पूजयेद्भक्तिभावेन जलैः संस्थाप्य शीतलैः ॥
उद्वर्त्तनञ्च दातव्यं सुगन्धामलकीं तथा।
तैलं सुगन्धं हरये ग्रीष्मकाले दिने दिने ॥
सुवासिते शीतले च मन्दिरेऽतिमनोहरे।
प्रत्यहं कमलाकान्तं स्थापयेत् जलमण्डपे ॥
न रौद्रदेशे विप्रेन्द्र सधूमे रन्धनालये।
न सूतिकागृहे चैव स्थापयेत् कमलापतिम् ॥
चामरैर्वीजितः श्वेतैः सुदीर्घैः कमलापतिः।
ज्यैष्ठे मासि द्विजश्रेष्ठ सुप्रीतः किं न यच्छति ॥
मयूरपुच्छव्यजनैर्निदाघे पूजितो हरिः।
ददात्यभिमतं सर्व्वं अचिरेणैव सत्तम ॥
तालवृन्तकवातेन पवित्रःस्वरवायुना।
यैर्ग्रीष्मे वीज्यते विष्णुस्ते सर्व्वे स्वर्गगामिनः ॥
यो गात्रलेपनं कुर्य्यात् सुवर्ण्यैश्चकर्द्दमैः।
ग्रीष्मे हरेश्चन्दनैश्च स विशेन्माधवीं तनुम् ॥
गन्धैर्म्मृगमदाद्यैश्च यो लिम्पेन्माधवीं तनुम्।
उष्णागमे द्विजश्रेष्ठ स मुक्तो नात्र संशयः ॥
प्रफुल्लकुमुदोद्याने तुलसीकानने तथा।
सन्ध्यायां स्थापयेद्विष्णुं देशे धीरसमीरणे ॥
स्रग्भिः पाटलिपुष्पाणां येन विष्णुरलङ्कृतः।
ज्यैष्ठे मासि स विज्ञेयो वाजिमेधसहस्रकृत् ॥
यस्तु मुक्तावलीं दद्यात् ग्रीष्मे श्रीपतये जनः।
भूपालत्वं हरिस्तस्मै यच्छेज्जन्मनि जन्मनि ॥
यस्तु मण्डयति ग्रीष्मे श्रीकृष्णं मणिमालया।
तस्य पुण्यफलं विप्र वदतो मे निशामय ॥
यावद्ब्रह्मा सृजत्येतत् जैमिने सकलं जगत्।
तावद्विष्णुपुरे तिष्ठेन्मणिमालाविभूषितः ॥
सुवर्णाभरणैर्यस्तु रजताभरणैस्तथा।
कृष्णं मण्डयति ग्रीष्मे सोऽपि तत्फलमाप्नुयात्
विचित्रं यस्तु पर्य्यङ्कं सगण्डुकं प्रयच्छति।
हरये देवदेवाय न स्याद्दुःखी कदापि सः ॥
ग्रीष्मकाले न देयानि गुरूणि वसनानि च।
हरये ब्राह्मणश्रेष्ठ देयं तन्वंशुकं शुचि ॥
यस्तु चूतफलैर्दिव्यैः सुपक्वैः पूजयेद्धरिम्।
अन्ते शक्रपुरं गत्वा स पिबेदमृतं मुदा ॥
पियालानां फलैः पक्वैर्योऽर्च्चयेत् कमलापतिम्
सोऽपि तत्फलमाप्नोति किमन्यैर्ब्बहुभाषितैः॥
निदाघे हरये दद्याद्यवागूमतिशीतलाम्।
नानाव्यञ्जनसंयुक्तां श्रद्धया वैष्णवो जनः ॥*॥
आषाढे मासि विप्रेन्द्र देवदेवं जगत्पतिम्।
दधिभिः स्नापयित्वा तु पूजयेद्भक्तितो बुधः ॥
दधिभिः स्नापयेद्यस्तु भगवन्तं जनार्द्दनम्।
मातुः पयोधरपयः पुनस्तेन न पीयते ॥
घनागमे घनश्यामं कदम्बकुसुमैर्हरिम्।
आराध्य यान्ति विप्रर्षे पापिनोऽपि परां
गतिम् ॥
कदम्बपुष्पमालाभिर्म्मण्डयत्यब्जलोचनम्।
यस्तस्य ब्राह्मणश्रेष्ठ पुण्यं वच्मि निशामय ॥
तस्यां यावन्ति मालायां तिष्ठन्ति कुसुमानि वै।
प्रतिपुष्पे द्विजश्रेष्ठ वाजिमेधफलं लभेत् ॥
सुगन्धैः केतकीपुष्पैः पूजितः कमलेक्षणः।
सर्व्वं दुःखं हरत्येष मानवानां द्विजोत्तम ॥
पनसानां फलैर्दिव्यैः सुपक्वैर्घृतमिश्रितैः।
पूजितो भगवान् विष्णुर्द्दात्यैश्वर्य्यमुत्तमम् ॥
आषाढ़े मासि दध्यन्नं हरये प्रतिवासरम्।
श्रद्धया वैष्णवो दद्यान्मुक्तिमिच्छुर्द्विजोत्तम ॥
कृष्णाय नवनीतं यो ददाति वैष्णवो जनः।
तस्य पुण्यं न संख्यातुं शक्नोम्यब्दशतैरपि ॥
हैयङ्गवीनं यो दद्याद्गोपालाय महात्मने।
आमिक्षां सगुड़াञ्चैव स महात्मा हरेः प्रियः ॥
सशर्कराणि दुग्धानि कृष्णाय यस्तु यच्छति।
तस्य प्रसन्नो भगवान् ददात्यभिमतं फलम् ॥*॥
श्रावणे मासि विप्रेन्द्र देवकीनन्दनं प्रभुम्।
स्नापयेन्निर्म्मलैस्तोयैः शुद्धैः कलुषवर्ज्जितैः ॥
मल्लिकाकुसुमैर्विष्णुं योऽर्च्चयेद् वैष्णवो जनः।
विमुक्तः सकलैः पापैर्ब्रह्मलोकं स गच्छति ॥
शेफालिकाप्रसूनैश्च यूथिकाकुसुमैस्तथा।
अर्च्चयन् कमलाकान्तं मनुजो नावसीदति ॥
सुगन्धैः स्तगरैः पुष्पैः सप्तलाकुसुमैस्तथा।
योऽर्च्चयेत् कमलाकान्तं तस्य वश्यं जगत्त्रयम् ॥
प्रफुल्लैर्म्मालतीपुष्पैः सुगन्धैर्योऽर्च्चयेद्धरिम्।
तत्पुण्यं नास्ति तत्तुल्यो येन स्याद्भुवि
मानवः ॥
कुन्दपुष्पैश्च बन्धूकैर्ज्जगद्बन्धुं जनार्द्दनम्।
अर्च्चयन् सकलं काममाप्नोति भुवि मानवः ॥
महासहाप्रसूनैश्च तथा कुरुवकैर्हरिम्।
कुरुण्टकैः पूजयेद्यस्तस्य तुष्टः सदा हरिः ॥
शिरीषकुसुमैर्विष्णुं प्रस्यपुष्पैश्च योऽर्च्चयेत्।